**भूर्जः** The birch-tree; भूर्जगतोऽक्षरविन्यासः V. 2; Ku. 1. 7; 'भूर्जः कटुः कषायोष्णो भूतरक्षाकरः परः' Rājanighaṇṭu. **-र्जम्** 1 A leaf made of birch-bark for writing on. -2 A written deed, document. **-Comp. -कण्टकः** a man of one of the mixed tribes, the offspring of an outcast Brāhmaṇa by a woman of the same class; व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः Ms. 10. 21. **-पत्रः** the birch-tree.

**भूर्णिः** *f.* 1 The earth. -2 A desert.

**भूष्** 1 P., 10 U. (भूषति, भूषयति-ते, भूषित) 1 To adorn, deck, decorate; शुचि भूषयति श्रुतं वपुः Bk. 20. 15. -2 To decorate oneself (Ātm.); भूषयते कन्या स्वयमेव -3 To spread or strew with, overspread; नखप्रभाभूषितकङ्कपत्रे R. 2. 31. -*With* अभि to adorn, grace, give beauty to; अहरत सुतरामतोऽस्य चेतः स्फुटमभिभूषयति स्त्रियस्त्रपैव Śi. 7. 38.

**भूषणम्** [भूष्यतेऽनेन भूष्-करणे ल्युट्] 1 Ornamenting, decoration. -2 An ornament, decoration, an article of decoration; क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् Bh. 2. 19; R. 3. 2; 13. 57. **-णः** N. of Viṣṇu. **-Comp. -वासस्** *n.* pl. clothes and ornaments; Ms. 8. 357.

**भूषा** [भूष्-भावे अ] 1 Decorating, adorning. -2 An ornament, decoration; as in कर्णभूषा q. v.; दम्पत्योः पर्यदात् प्रीत्या भूषावासः परिच्छदान् Bhāg. 3. 22. 23. -3 A jewel; नभोभूषा पूषा कमलवनभूषा मधुकरः...... सकलगुणभूषा च विनयः Subhāṣ.

**भूषाय** Den. Ā. To serve as an ornament.

**भूषित** *p. p.* [भूष्-क्त] Decorated, ornamented; मणिना भूषितः सर्पः किमसौ न भयंकरः.

**भूष्णु** *a.* [भू-ग्स्नु] 1 Being, becoming; as in अलंभूष्णु q. v. -2 Wishing for wealth or prosperity; क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम्। नावमन्येत वै भूष्णुः कृशानपि कदाचन॥ Ms. 4. 135.

**भृ** 1, 3 U. (भरति-ते; बिभर्ति-बिभृते, बभार-बभ्रे, बिभरांचकार-चक्रे, अभार्षीत्-अभृत, भरिष्यति-ते, भर्तुम्, भृत; *pass.* भ्रियते, *desid.* बिभरिषति-ते or बुभूर्षति-ते) 1 To fill; जठरं को न बिभर्ति केवलम् Pt. 1. 22. -2 To fill, pervade, fill with; अभार्षीद् ध्वनिना लोकान् Bk. 15. 24. -3 To bear, support, uphold, bear up; धुरं धरित्र्या बिभरांबभूव R. 18. 45; कूर्मो बिभर्ति धरणीं खलु पृष्ठकेन Ch. P. 50; Bk. 17. 16. -4 To maintain, foster, cherish, protect, take care of, nourish; भरस्व पुत्रं दुष्यन्त Bhāg. 9. 20. 21; दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् H. 1. 14. -5 To bear, have, possess; सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् Ki. 8. 57; पिशुनजनं खलु बिभ्रति क्षितीन्द्राः Bv. 1. 74; वलित्रयं चारु बभार बाला Ku. 1. 39; इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति Me. 86; Ś. 2. 4. -6 To wear; बिभ्रज्जटामण्डलम् Ś. 7. 11; 6. 5; विवाहकौतुकं ललितं बिभ्रत एव (तस्य) R. 8. 1; 10. 10; जटाश्च बिभृयान्नित्यम् Ms. 6. 6. -7 To feel, experience, suffer, endure (joy, sorrow &c.); भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैः Śi. 14. 50; संत्रासमबिभः शक्रः Bk. 17. 108; Ś. 7. 21. -8 To confer, bestow, give, produce; यौवने सदलंकाराः शोभां बिभ्रति सुभ्रुवः Subhāṣ. -9 To keep, hold, retain (as in memory). -10 To hire; Ms. 11. 62; Y. 3. 235. -11 To bring or carry. -12 To take away, transport. -13 Ved. To acquire, gain. -14 To balance, hold in equipoise (as a pair of scales). (गर्भं भृ to become pregnant, conceive; क्षितिं भृ to rule the earth; जटां भृ to wear matted hair &c.).

**भृत्** *a.* (At the end of comp.) 1 Bearing, carrying. -2 Supporting, nourishing. -3 Possessing, having; प्रथमे मानभृतां न वृष्णयः Ki. 2. 44. -4 Bringing, procuring, &c.

**भृत** *p. p.* [भृ-क्त] 1 Borne. -2 Supported, maintained, cherished, fostered. -3 Possessed, endowed or furnished with. -4 Full of, filled with. -5 Hired; नानुग्रहभृतः कश्चित् Mb. 3. 15. 22. **-तः** A hired servant; hireling, mercenary; कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः Rām. 2. 100. 33; उत्तमस्त्वायुधीयो यो मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवं त्रिविधो भृतः Mitā.

**भृतक** *a.* [भृतं भरणं वेतनमुपजीवति कन्] 1 Nourished; कैकेय्या न वयं राज्ये भृतका हि वसेमहि Rām. 2. 48. 23. -2 Hired, paid. **-कः** A hired servant;......द्वादशमंशं भृतकः Kau. A. 2. 8. 26; रक्षेत भृतकोऽरण्ये यथा गास्तादृगेव सः Mb. 3. 33. 24. **-Comp. -अध्यापकः** a hired teacher. **-अध्यापनम्** instruction given by a hired teacher; भृतादध्ययनादानं भृतकाध्यापनं तथा Y. 3. 235. **-अध्यापित** *a.* taught by a paid teacher. (**-तः**) a student who pays his teacher for his labour (='a paying student' of the modern days); भृतकाध्यापको यश्च भृतकाध्यापितस्तथा Ms. 3. 156.

**भृतिः** *f.* [भृ-क्तिन्] 1 Bearing, upholding, supporting. -2 Cherishing, maintaining. -3 Bringing, leading to. -4 Nourishment, support, maintenance. -5 Food. -6 Wages, hire; त्रिभिः प्रकारैर्भृतिर्भवति व्यापारतः फलतो वचनत इति ŚB. on MS. 10. 3. 45; भृतिश्च कर्मकरेभ्य आनत्यर्थं यद्दीयते ŚB. on MS. 10. 2. 27; cf. also कालमानं त्रिधा ज्ञेयं चान्द्रं सौरं च सावनम्। भृतिदाने सदा सौरं चान्द्रं कौसीदवृद्धिषु॥ Śukra. See also Śukra. 3. 266. -7 Service for hire. -8 Capital, principal. -9 Wages, hire. **-Comp. -अध्यापनम्** teaching (especially the Vedas) for hire. **-अर्थम्** *ind.* on account of the maintenance; प्रजानामेव भूत्यर्थं (v. l. for भूत्यर्थं) स ताभ्यो बलिमग्रहीत् R. 1. 18. **-भुज्** *m.* a hired servant, a hireling. **-रूपम्** a reward in place of the wages due, but not to be paid.

**भृत्य** *a.* [भृ क्यप् तुक् च] To be nourished or maintained &c. **-त्यः** 1 Any one requiring to be supported. -2 A servant, dependant, slave. -3 A king's servant, minister of state; भृत्यप्रणाशो मरणं नृपाणाम् H. 2. 136. -4 A subject. **-त्या** 1 Rearing, fostering, nourishing, taking care of; as in कुमारभृत्या q. v. -2 Maintenance, support. -3 A means of sustenance, food. -4 Wages. -5 Service. **-Comp. -अध्यापनम्** teaching the Veda for hire; Ms. 11. 62. **-जनः** 1 a servant, dependant. -2 servants taken collectively. **-भर्तृ** *m.* the master of